# Kaliyakritam 2 Shri Krishna Stotram

# कालियकृतं २ श्रीकृष्णस्तोत्रम्

## Document Information

Text title : Kaliyakritam 2 Shri Krishna Stotram

File name : kAliyakRRitaM2shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, viShNupurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : viShNupurANa | bhAga 5 | adhyAya 7/61-76||

Latest update : October 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2024

*sanskritdocuments.org*

# कालियकृतं २ श्रीकृष्णस्तोत्रम्

कालियउवाच ।
यस्माद्ब्रह्मा च रुद्रश्च चन्द्रेन्द्रमरुतोऽश्विनौ ।
वसवश्च सहादित्यैस्तस्य स्तोष्यामि किं न्वहम् ॥ ५-७-६१॥

एकावयवसूक्ष्मांशो यस्यैतदखिलं जगत् ।
कल्पनावयवस्त्वेष तं स्तोष्यामि कथं न्वहम् ॥ ५-७-६२॥

सदसद्रूपिणो यस्य ब्रह्माद्यास्त्रिदशोत्तमाः ।
परमार्थं न जानन्ति तस्य स्तोष्यामि किं न्वहम ॥ ५-७-६३॥

ब्रह्माद्यैरर्च्यते दिव्यैर्यश्च पुष्पानुलेपनैः ।
नन्दनादिसमुद्भूतैः सोऽर्च्यते वा कथं मया ॥ ५-७-६४॥

यस्यावताररूपाणि देवराजः सदार्चति ।
न वेत्ति परमं रूपं सोऽर्च्यते वा कथं मया ॥ ५-७-६५॥

विषयेभ्यः समावृत्य सर्वाक्षाणि च योगिनः ।
समर्चयति ध्यानेन सोऽर्च्यते वा कथं मया ॥ ५-७-६६॥

हृदि सङ्कल्प्य यद्रूपं ध्यानेनार्चन्ति योगिनः ।
भावपुष्पादिना नाथ! सोऽर्च्यते वा कथं मया ॥ ५-७-६७॥

सोऽहं ते देवदेवेश! नार्चनायां स्तुतौ न च ।
सामर्थ्यवान् कृपामात्र-मनोवृत्तिः प्रसीद मे ॥ ५-७-६८॥

सर्पजातिरियं क्रूरा यस्यां जातोऽस्मि केशव ।
तत्स्वभावोऽयमत्रास्ति नापराधो ममाच्युत ॥ ५-७-६९॥

सृज्यते भवता सर्वं तथा संह्रियते जगत् ।
जाति-रूपृ-स्वभावाश्च सृज्यन्ते सृजता त्वया ॥ ५-७-७०॥

यथाहं भवता सृष्टो जात्या रूपेण चेश्वर ।

स्वभावेन च संयुक्तस्तथेदं चेष्टितं मया ॥ ५-७-७१॥

यदन्यथा प्रवर्त्तेयं देवदेव ! ततो मयि ।
न्याय्यो दण्डनिपातो वै तवैव वचनं यथा ॥ ५-७-७२॥

तथापि यज्जगत्स्वामी दण्डं पातितवान् मयि ।
स श्लाघ्योऽयं वरं दण्डस्त्वत्तो नान्यत्र मे वरः ॥ ५-७-७३॥

हतवीर्यो हतविषो दमितोऽहं त्वयाच्युत ।
जीवितं दीयतामेकमाज्ञापय करोमि किम् ॥ ५-७-७४॥

श्रीकृष्ण उवाच ।
नात्र स्थेयं त्वया सर्प! कदाचिद्यमुनाजले ।
सभृत्यपरिवारस्त्वं समुद्रसलिलं व्रज ॥ ५-७-७५॥

इति विष्णुपुराणे पञ्चमभागे सप्तमाध्यायान्तर्गतं
कालियकृतं श्रीकृष्णस्तोत्रं समाप्तम् ।

विष्णुपुराण । भाग ५। अध्याय ७/६१-७६ ॥

viShNupurANa . bhAga 5. adhyAya 7/61-76..

Proofread by PSA Easwaran

*Kaliyakritam 2 Shri Krishna Stotram*

pdf was typeset on October 2, 2024

Please send corrections to *sanskrit@cheerful.com*